mahAkAlabhairavAShTakam

# महाकालभैरवाष्टकम् अथवा तीक्ष्णदंष्ट्रकालभैरवाष्टकम्

## Document Information


Text title : mahAkAlabhairavAShTakam

File name : mahAkAlabhairavAShTakam.itx

Category : aShTaka, shiva, bIjAdyAkSharamantrAtmaka

Location : doc_shiva

Proofread by : Sunder Hattangari Ruma Dewan

Latest update : June 5, 2022

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.


July 22, 2023

*sanskritdocuments.org*

# महाकालभैरवाष्टकम् अथवा तीक्ष्णदंष्ट्रकालभैरवाष्टकम्

ॐ

यं यं यं यक्षरूपं दशदिशिविदितं भूमिकम्पायमानं
  सं सं संहारमूर्तिं शिरमुकुटजटा शेखरं चन्द्रबिम्बम् ।
दं दं दं दीर्घकायं विकृतनखमुखं चोर्ध्वरोमंकरालं
  पं पं पं पापनाशं प्रणमत सततं भैरवं क्षेत्रपालम् ॥ १॥

रं रं रं रक्तवर्णं कटिकटिततनुं तीक्ष्णदंष्ट्राकरालं
  घं घं घं घोष घोषं घ घ घ घ घटितं घर्झरं घोरनादम् ।
कं कं कं कालपाशं धृक्धृक्धृकितं ज्वालितं कामदाहं ( var कं कं कङ्कालपाशं)
  तं तं तं दिव्यदेहं प्रणमत सततं भैरवं क्षेत्रपालम् ॥ २॥ ( var दं दं दं)

लं लं लं लम्बदन्तं ल ल ल ल ललितं दीर्घजिह्वाकरालं
  धूं धूं धूं धूम्रवर्णं स्फुटविकटमुखं भास्करं भीमरूपम् ।
रुं रुं रुं रुण्डमालं रवितमनियतं ताम्रनेत्रं करालं
  नं नं नं नग्नभूषं प्रणमत सततं भैरवं क्षेत्रपालम् ॥ ३॥

वं वं वं वायुवेगं नतजनसदयं ब्रह्मसारं परन्तं
  खं खं खं खड्गहस्तं त्रिभुवनविलयं भास्करं भीमरूपम् ।
चं चं चं चं चलित्वाऽचल चल चलिता चालितं भूमिचक्रं
  मं मं मं मायिरूपं प्रणमत सततं भैरवं क्षेत्रपालम् ॥ ४॥

शं शं शं शङ्खहस्तं शशिकरधवलं मोक्षसम्पूर्णतेजं
  मं मं मं मं महान्तं कुलमकुलकुलं मन्त्रगुप्तं सुनित्यम् ।
यं यं यं भूतनाथं किलिकिलिकिलितं बालकेलिप्रधानं
  अं अं अं अन्तरिक्षं प्रणमत सततं भैरवं क्षेत्रपालम् ॥ ५॥

खं खं खं खड्गभेदं विषममृतमयं कालकालं करालं
  क्षं क्षं क्षं क्षिप्रवेगं दहदहदहनं तप्तसन्दीप्यमानम् ।
हूं हूं हूंकारनादं प्रकटितगहनं गर्जितैर्भूमिकम्पं ( var हं हं हङ्कारनादम्)

बं बं बं बाललीलं प्रणमत सततं भैरवं क्षेत्रपालम् ॥ ६॥

सं सं सं सिद्धियोगं सकलगुणमखं देवदेवं प्रसन्नं
पं पं पं पद्मनाभं हरिहरमयनं चन्द्रसूर्याग्निनेत्रम् ।
ऐं ऐं ऐश्वर्यनाथं सततभयहरं पूर्वदेवस्वरूपं
रौं रौं रौं रौद्ररूपं प्रणमत सततं भैरवं क्षेत्रपालम् ॥ ७॥

हं हं हं हंसयानं हसितकलहकं मुक्तयोगाट्टहासं
धं धं धं नेत्ररूपं शिरमुकुटजटाबन्धबन्धाग्रहस्तम् ।
टं टं टङ्कारनादं त्रिदशलटलटं कामगर्वापहारं
भ्रूं भ्रूं भ्रूं भूतनाथं प्रणमत सततं भैरवं क्षेत्रपालम् ॥ ८॥

भैरवाष्टकमिदं पुण्यं षण्मासं यः पठेन्नरः ।
स याति परमं स्थानं यत्र देहो महेश्वरः ॥

इति महाकालभैरवाष्टकं सम्पूर्णम् ।
श्रीक्षेत्रपालभैरवाष्टकम्

नमो भूतनाथं नमः प्रेतनाथं
नमः कालकालं नमः रुद्रमालम् ।
नमः कालिकाप्रेमलोलं करालं
नमो भैरवं काशिकाक्षेत्रपालम् ॥

Variations पाठभेद are indicated as var and
there may still be variations in the print.

Proofread by Sunder Hattangari, Ruma Dewan

*mahAkAlabhairavAShTakam*

pdf was typeset on July 22, 2023

Please send corrections to *sanskrit@cheerful.com*